Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 1 | ISSN : 2581- 6306

# प्रवर्तमानायारुच्चशिक्षायाः प्रमुखाः समस्याः

**अनिता**
**असिस्टेंट प्रोफेसर, शिक्षापीठम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली**

Article Info

**Publication Issue :**
January-February-2023
Volume 6, Issue 1
**Page Number :** 37-41
**Article History**
Received : 10 Jan 2023
Published : 30 Jan 2023

**शोधलेखसारांशः**

आत्मना वीर्यं विन्दते विद्यया अमृतं विन्दतेति मुण्डकोपनिषदि धीयो विद्याधनं प्रधानधनमिति धीया च मुक्तकण्ठेन कथयितुं शक्नोमि यत् विद्यया शिक्षया वा प्रशिक्षणेनैव मानवः स्वावबोधं सत्वावबोधं वा आत्मावबोधं एवं च इह लोके सानन्देन जीवनं यापयितुं समर्थाः भवन्ति। अर्वाचीनेऽस्मिन् काले अस्याः दशा कीदृशीति परस्परं सर्वे अनुभवन्त्येव। तथापि या प्रमुखाः समस्या अर्वाचीनेऽस्मिन् काले परास्नातकीयोच्चशिक्षायां दृश्यमानाः भवन्ति, तासामुल्लेखनेन शोधपत्रेण प्रस्तुतेत्यलम्।

विद्याधनं सर्वधनप्रधानमिति धीया संसारेऽस्मिन् यानि धनानि परिदृश्यमानानि समुपलब्धानि च सन्ति, तेषु सर्वेषु धनेषु अन्यतमं प्रधानभूतञ्च विद्याधनमित्यस्तीति मुक्तकण्ठेण सर्वैः स्वीक्रियते। 2009 तमे वर्षे सर्वकारेणाऽपि मौलिकाधिकारान्तर्गते शिक्षाधिकारस्य संस्तुतीप्रदाय महनीयतमः मानवव्यक्तिस्वस्य सर्वाङ्गीणविकासे स्वयोगः प्रदत्तः। अनेन विद्याधनेन वस्तुपदार्थादीनां यथार्थज्ञानेन सह बोध-सत्ता-लाभ-विचार-चित्ताख्या-मोक्षादीनाञ्च प्रत्यक्षज्ञानं प्राप्तुं शक्यते। अयथार्थस्तु मृगमरीचिका एवोच्यते। एषा मानवानां पशूणां च कृते आवश्यकीति कथयितुं शक्यते। यतोहि पुराकाले ऋषिणामाश्रमे प्रायशः पशवो प्रशिक्षिताः आसन् तदेव तैः तैभिस्सह वार्तामपि कर्तुं समर्थाः भवन्ति स्म। शास्त्रेष्वपि शुकोवाच काकोवाचेत्यादीनां स विषये बहवः प्रसंगाः श्रीमद्रामायणेन सह पुराणादिषु साहित्येषु तत्रापि सात्विकपुराणेषु प्राप्तानि भवन्ति। वस्तुतस्तु विभिन्नैः साधनैः प्रक्रियाभिश्च एषा प्राप्यते। तेषां साधनानां प्रक्रियाणाञ्च विषये विमर्शनानि दार्शनिकाः समाजशास्त्रिणः शिक्षाशास्त्रिणश्च कृतवन्तः कुर्वन्ति च। द्वाभ्यां प्रक्रियाभ्यां वा अन्याभिः प्रक्रियाभिश्च प्राप्यमानायाः अस्याः शिक्षायाः औपचारिकत्वेन

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

आधाभूताया: संरचनाया: विभाजनं शैक्षिकप्रबन्धशास्त्रे मानवीयत्वेन भौतिकत्वेन च द्विधा कृतमस्ति। यदि शिक्षालये उभयो: संसाधनयोर्मध्ये यदि सामञ्जस्यं संस्कृतेन सह च भवति चेत् तस्मिन् वातावरणे प्रदीयमाना शिक्षा नूनमेव फलीभूता भविष्यति। यतोहि छात्राणं व्यक्तित्वस्य सर्वेषां पक्षाणां विकासस्य दायित्वमुभयोरेव भवति। एतदर्थं सर्वत्र शिक्षालयेषु उभयो: संसाधनयो: सामञ्जस्ये बलं प्रदीयते। अस्याभावे अर्वाचीनेऽस्मिन् कालेऽपि यत्र उभयोरभाव: वा उभौ प्रत्युपेक्षाभावं प्रदर्श्यते तत्र एषा फलीभूता न भवति। तत्रत्या: जना: एव पशुवदाचरन्ति अधर्मेषु अत्याचारेषु च प्रवृत्ता: भवन्ति। शिक्षाया: आधारभूतासु संरचनात्मकतत्त्वेषु निम्नलिखितानि तथ्यानि मुख्यानि भवन्ति। तद्यथा –

शिक्षाया: मानवीयाया: आधारभूताया: संरचनाया: साक्षात् सम्बन्ध: शब्दजात्यानुगुणं मानवैस्सह वर्तते। अस्यान्तर्गते केन्द्रत्वेन छात्र: शिक्षक: कर्मचारिणश्च भवन्ति। एषां त्रयाणां स्वकर्तव्यावबोधे शिक्षाधारिता भवति। औपचारिकशिक्षायान्तु अत्यावश्यकेषु साधनतमेषु एषां त्रयाणां समाहार: क्रियते। यतोहि शिक्षाया: विकास: नवज्ञानप्राप्तिश्च एतै: जायते। संक्षेपेण एषां परिचय: समुपस्थाप्यते। तद्यथा–

**छात्र:** – विद्यार्थी, अन्तेवासी, शिष्यादिषु पर्यायेषु ध्वनितेषु अस्य छात्रविशेषरिति शब्दं परित: एव सम्पूर्णा शिक्षाव्यवस्था परिक्रमति। वस्तुतस्तु एषां छात्राणां व्यक्तित्वस्य सर्वाङ्गीणविकासाय सर्वकारीयाऽसर्वकारीयाऽऽभासिकसंस्थाभिश्च प्रयास: क्रियते। एतदर्थमर्वाचीने काले प्रवर्तमाना शिक्षाव्यवस्था छात्रकेन्द्रितेति उच्यते।

**अध्यापक:** – प्रेरक–बोधक–वाचक–दर्शक–सूचक–शिक्षकादिषु शब्देषु शब्दोऽयमध्यापक: ध्वन्यते। गुरो: पर्यायोऽयं शब्दोऽस्ति। **नास्ति तत्त्वं गुरो: परमिति** महिम्नधीया प्राच्यां प्रतीच्यां च गुरो: स्थानमत्यन्तं महत्त्वपूर्णं भवति। शिक्षासंरचनायां प्राच्यामस्य समाहार: मुख्येषु संसाधनेषु भवति तत्रैव पाश्चात्यमनीषायां गौणत्वेनापि प्रमुखं साधनत्वेन स्वीक्रियते।

**कर्मचारिण:** – शब्दोऽयं स्वविश्वतोमुखात् अत्यन्त: व्यापकोऽस्ति। अर्वाचीनेऽस्मिन् काले मार्क्सवादानुसारेण प्रकार्यवादानुसारेण च प्राचार्यादारभ्य बहूद्देश्यीमानवान् यावत् सर्वे कर्मचारिणश्च एव भवन्ति। अस्यान्तर्गते प्राचार्य:, प्रबन्धसमिति:, शिक्षाधिकारिण:, पर्यवेक्षका:, सचिव:, अनुभागप्रमुखा:, वित्तविभागीया:, लिपिका:, बहूद्देशीयमानवादयश्च समायान्ति।

**भौतिकसंसाधनम्** – अर्वाचीनेऽस्मिन् काले अत्यावश्यकेषु संसाधनेषु संसाधनोऽयं प्रमुखोऽस्ति। पुराकाले स्वतन्त्रे प्रकृतौ शिक्षां देवै: प्रदीयते स्म। कालक्रमेण आश्रम–मठ–मन्दिरादिसु अस्या: व्यवस्थापनमभवत्।

तदनन्तरे कालक्रमेण शिक्षायै अन्यतमानां गुणैः विभूषितानां नालन्दा–तक्षशिला–विक्रमशिलादिषु वृहत्तमे भवनेषु यत्र मानवस्य सर्वाङ्गीणविकाससम्बद्धानि सर्वाणि भौतिकानि मानवीयानि च संसाधनानि समुपलब्धानि भवन्ति स्म। नालन्दामहाविहारः स्वदेशे अस्य इदानीमपि प्रत्यक्षोदाहरणमिति द्रष्टुं शक्यते। भौतिकसंसाधनान्तर्गते यानि तत्त्वानि प्रमुखानि आवश्यकानि भवन्ति। तानि निम्नलिखितानि सन्ति। तद्यथा –

(i) भवनम् (ii) असन्दिका (iii) प्रकाशः (iv) जलम् (v) कक्षा (vi) पुस्तकालयः (vii) प्रयोगशाला (viii) आभासीयकक्षा (ix) कार्यकक्षः (x) दृश्यश्रव्यसामग्रीकक्षः (xi) छात्रावासः (xii) क्रीडाक्षेत्रम् (xiii) व्यायामशाला (xiv) मनोरञ्जनकक्षः (xv) भाषाप्रयोगशाला (xvi) भाषाकक्षादयश्च।

उपर्युक्तानि यानि भौतिकसंसाधनान्तर्गतानि संसाधनानि परिगणितानि सन्ति तानि सर्वाणि शिक्षकेभ्यः सहयोगात्मकानि एवञ्च छात्राणां व्यक्तित्वस्य सर्वाङ्गीणे विकासे सहायकानि भवन्तीति सर्वे स्वीकुर्वन्ति परिदृश्यमानाश्च सन्ति। शैक्षिकप्रबन्धनशास्त्रस्य सिद्धान्तानुसारेणैषां सर्वेषां संसाधनानां सम्यग् प्रबन्धनेन, शिक्षालयः आधारभूतासंरचनया परिपुष्टः भवितुमर्हन्ति। यतोहि एषां सर्वेषां महत्तमं योगदानं तेषां व्यक्तित्वस्य विकासे भवति। शिक्षायै आधारभूता संरचनाऽऽवश्यकीति कथयितुं शक्यते। यतोहि अस्याऽभावे शिक्षा न तु दीयमाना गतिशीला वा निरन्तरा भवितुमर्हति। अतः उभयोः संसाधनयोः महत्तमं योगदानम् अस्यामाधारभूतायां संरचनायां भवति। वस्तुतस्तूभयोः संसाधनयोः नितान्ताभावः प्रायशः केचन विद्यालयं विहाय सर्वेषु विद्यालयेषु द्रष्टुं शक्यते। संस्कृतशिक्षायां तत्रापि परम्परागतसंस्कृतशिक्षायान्तु नूनमेव नितान्ताभावः तत्रापि ग्रामीणपरिवेशेषु या दशा दृश्यमाना भवति सा देवाधीना दशैव कथयितुं शक्यते। तदेव संगठनात्मकं यदुद्देश्यं पूर्वादपि निर्धारितमस्ति तत् प्राप्तुं शक्यते। आसु सर्वासु आधारभूतासु संरचनासु सम्यग् समन्वयनेन नियोजनेन निर्देशनेन नियन्त्रणेन सुप्रबन्धनेन शिक्षोद्देश्यस्य प्राप्तिर्जायते। संसाधनत्वेन परिगणितानामाधारभूतानां संसाधनानां सुप्रबन्धनेन शिक्षोद्देश्यसाधिका सुदृढ़ा एवञ्च छात्राणां व्यक्तित्वस्य सर्वाङ्गीणविकासे सहयोगात्मिका भवति।

अतः आधारभूतायाः समस्यायाः समाधानं शिक्षायै राष्ट्राय छात्राणां व्यक्तित्वस्य विकासाय च आवश्यकमस्तीति कथयितुं शक्यते। अनया साक्षात् शिक्षा प्रभाविता भवति। अस्याः आधारभूतायाः समस्यायाः समाधानाय सर्वकारेण (केन्द्रीयेन राजकीयेन वा) अन्यैः असर्वकारीयैः संस्थाभिश्च निरन्तरः प्रयासरतोऽस्तीति सर्वत्र सर्वे स्वनेत्राभ्यां पश्यति अन्यैरिन्द्रियैरनुभवन्ति च।

**महार्धात्मिका उच्चशिक्षा**

सुशिक्षाऽभावे सभ्यनागरिको न च ग्रामिणः भवितुमर्हति। अर्वाचीनेऽस्मिन् काले देशेऽस्मिन् एका विचित्रतमा विडम्बना प्रवर्तमानास्ति यत् एकस्मिन् पक्षे एषा मौलिकाधिकारैः सम्पृक्ता तत्रैव अपरस्मिन् पक्षे महार्धात्मिका किं वच्मि? तथाऽपि भारतीयसनातनमनीषायां त्रिभिर्प्रकारैवेषा अस्याः प्राप्तेः न च कश्चनान्यः मार्ग वा प्रक्रियाविशेषः येन एषा प्राप्स्यात्। यैः त्रिभिर्प्रकारैरेषा उपयुक्तेति तेषु प्रथममुच्यते **गुरुसुश्रुषया विद्या** अर्थात् सुपरिवेशे गुरुर्मुखात् निर्गतायाः विद्यायाः सावधानेन श्रवणेन तां प्रति सश्रद्धाभावेन, तस्याः विद्यायाः प्राप्तिर्जायते। अपरः प्रकारः पुष्कलेन वा धनेन अस्याः प्राप्तिर्जायते। प्रकारोऽयं शिक्षायाः सर्वेषु क्षेत्रेषु स्तरेषु स्वमाहात्म्यवशादेका विभीषिका महनीयता समस्या च वर्तते। धनेन यस्याः विद्यायाः शिक्षायाः वा कौशलानां प्राप्तिर्जायते सा व्यावसायिकेति शिक्षेति नाम्ना अर्वाचीनेऽस्मिन् काले जायते अभिधीयते। तृतीयः प्रकारः यस्य अभावः सर्वत्र द्रष्टुं शक्यते। पुराकाले सर्वशिक्षायाः आधारोपि एषः प्रकारः एव आसीत्। **'यो भवति'** अथवा **'विद्याया विद्या'** अर्थात् गुरुपरम्परया या विद्याप्राप्यते सा भवति अथवा विद्यया विद्या संकुचितार्थेन। शिष्योपशिष्यैरुदगीयमानमिति धीया वा अर्वाचीनेऽस्मिन् काले शिक्षासंस्थासु शिक्षणविधित्वेन समवयस्कप्रबोधनमिति विधेः प्रयोगः क्रियते। सर्वेभ्यः नागरिकेभ्यः वैश्विकजनेभ्यश्च अर्वाचीनेऽस्मिन् काले शिक्षायै यानि संसाधनानि अपेक्षितानि तेषां पूर्त्यर्थमधिकं धनमपेक्षतेति मुक्तकण्ठेन कथयितुं शक्यते। तावद्धनं न तु केन्द्रीयशिक्षायाः सुप्रबन्धनाय केन्द्रसर्वकारेण तत्रैव राजकीयशिक्षायाः सुपबन्धनाय राज्यसर्वकारेण दीयते। एतदर्थं राज्येन केन्द्रेण च सर्वकारेण शिक्षायाः विश्वतोमुखाय अधिकं धनं नूनमेव प्रदातव्यम्। अन्याः याः प्रमुखाः समस्याः ताः स्वसत्तायां प्रावर्त्तमानायाः शिक्षायाः तादृश्य अन्यतमाः समस्याः वर्तन्ते। यासु विशिष्टशोधलेखावकाशः भवितव्यः। याः प्रवर्त्तमानायारुच्चशिक्षायाः प्रमुखाः समस्याः ताः निम्नलिखिताः भवन्ति। तद्यथा –

i. आधारभूतसंरचनायामल्पता।
ii. शिक्षाप्रबन्धनेन सम्बद्धा समस्या।
iii. सर्वकारीयानुदानसम्बद्धा समस्या।
iv. तकनीकीति सम्बद्धा समस्या।
v. समावेशात्मिका शिक्षासम्बद्धा समस्या।
vi. अवसरसम्बद्धा समस्या।
vii. गुणवत्तासम्बद्धा समस्या।

viii. शिक्षकशिक्षासम्बद्धा समस्या।

ix. विभिन्नविभेदीकरणस्य समस्या।

x. बहूमुल्यात्मिकोच्चशिक्षा।

xi. लैंगिकशिक्षासम्बद्धा समस्या।

एतासु सर्वासु मुख्यतमासु समस्यासु शोधलेखः क्रमशः विभिन्नैः शोधैः वा तल्लेखैः प्रदास्यते।

**सन्दर्भग्रन्थाः**


1. गुप्ता, अलका, गुप्ता, एस. पी., उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, इलाहाबाद, प्रथमसंस्करण 2003
2. भट्टाचार्य, जी. सी., अध्यापक शिक्षा, अग्रवाल पब्लिकेशन्स, शिक्षा संकाय, कमच्छा शैक्षिक संकुल, बी. एच. यू., वाराणसी
3. मणि, वाचस्पतिनाथ झा, शिक्षा मञ्जूषा (द्वितीय वर्ष), पोद्दार पब्लिकेशन, तारानगर कालोनी, धित्तूयुर, बी. एच. यू., काशी, प्रथमसंस्करण 2019
4. मणि, वाचस्पतिनाथ झा, समावेशात्मक शिक्षा, पोद्दार पब्लिकेशन, तारानगर कालोनी, धित्तूयुर, बी. एच. यू., काशी, प्रथमसंस्करण 2015
5. मणि, वाचस्पतिनाथ झा, पाठ्यचर्या–विद्यालयश्च, वीरबहादुर पब्लिकेशन, साउथ सीटी, रायबरेली रोड, लखनऊ, प्रथमसंस्करण 2016
6. त्रिपाठी, शालिग्राम, शैक्षिक मनोविज्ञान, वेंकटेश प्रकाशन, संस्कृत नगर, रोहिणी, दिल्ली, संस्करण 1992